जगुर्गंधर्वपतयो ननृतुश्चाप्सरो गणाः ।।
ततः स्कंदः प्रीतियुक्तः स्नात्वा सरसि शोभने ।। ८

सर्वतीर्थोदकैः स्नाप्य तल्लिंगं भक्ति संयुतः ।।
विविधैः पूजयामास पुष्पैर्मंत्रैश्च पंचभिः ।। ९

पूजाकाले स्वयं तत्र लिंगमध्ये स्थितो हरः ।।
जंगमा जंगमैः सार्धं स्वयं जग्राह पूजनम् ।। १०

ततस्तं पूजयन्प्राह स्कंदो भक्तिपरिप्लुतः ।।
केन केनोपहारेण त्वयि दत्तेन किं फलम् ।। ११

श्री महादेव उवाच ।।[1]
मम यः स्थापयेल्लिंगं शुभं सद्म च कारयेत् ।।
मल्लोके वसते(सौ च ~~[illegible]~~ ।।
यावच्चंद्र दिवाकरौ ।। १२

मम सद्मसुधाशुभ्रं यावत्संख्यं करोति यः ।।
तावंत्येव च जन्मानि यशसासौ विराजते ।। १३

ध्वजभूतो ध्वजं दत्त्वा विपाधः स्यात्पताकया ।।
विधाय चित्र विन्यास गंधर्वैः सह मोदते ।। १४

---

१ ब. श्री महादेव ।।

रजः[१] संशोधनं कृत्वा नरो रोगैः प्रमुच्यते ।।
प्राप्नोति देहं[२] हार्दं च सुरसद्मानुलेपनात् ।। १५

पुष्प क्षीरोदिभिर्दत्तैस्तिलैर्भोऽक्षतदर्भकैः ।।
शंभोः शिरसि दत्त्वार्घ्यं दिवि वर्षायुतं वसेत् ।। १६

घृतेन हतपापः स्यान्मधुना सुभगो भवेत् ।।
विरोगो दधि दुग्धाभ्यां लिंगं संस्नाप्य जायते ।। १७

[३]पानीयदधिदुग्धाद्यैः क्रमाद्दशगुणं फलम् ।।
मासं संस्नाप्य श्री वै भक्त्या पिष्टाद्यैश्च विरूक्षयेत् ।। १८

कपिलापंचगव्येन सुरसिंधुजलेन वा ।।
मां च संस्नाप्य चाभ्यर्च्य मल्लोकमधिगच्छति ।। १९

कुशोदकाद्गंध जलं दर्शे महीसगार संभवम् ।। २०

कपिलां दत्त्वा यदाप्नोति तत्फलं कलशे पृथक् ।।
मृताम्ररौप्य[४] सौवर्णैः क्रमाच्छतगुणं फलम् ।। २१

---

१ ब. रज
२ ब. देह
३ ब. यानि
४ ब. रूप्य

श्री खंडागरु काश्मीर शशिनः क्रमशो धिकाः ।।
मां च तैश्च समालभ्य स्याच्छीमान्सुभगः सुखी ।। २२

प्रशस्तो गुग्गुलो धूपस्तस्माच्चंद्रो गरुर्वरः ।।
धूपानेतान्नरो दत्वा सुखं स्वर्गमवाप्नुयात् ।। २३

दीपदः कीर्तिमाप्नोति चक्षुरुत्तममेव च ।।
नैवद्यस्य प्रदानेन नरो मृष्टाशनो भवेत् ।। २४

पुष्पेण हैमकर्णस्य प्रबद्धेन द्विसंगुणाम् ।।
फलमाप्नोति पुरुषः सत्यसंधश्च जायते ।। २५

अखंडैर्बिलवपत्रैश्च पुष्पैर्वा विविधैरपि ।।
लिंगं प्रपूरणी कृत्वा लक्षमेकं वसेदिवि ।। २६

यस्तु पुष्पगृहं कुर्यान्नरः शुद्धाशयो भवेत् ।।
पुष्पकेणा[1] विमानेन दिवि संक्रीडते चिरम् ।। २७

भूषाणां वरदानेन नरो भवति भोगभाक् ।।
सच्चामर प्रदानेन जायते पार्थिवो नरः ।। २८

---

१ ब. पुष्पकेन

रम्यं वितानं यो दद्याच्छत्रुभिर्नाभिभूयते ।।
गीतं वाद्यं [1]प्रनृत्यं च कृत्वा शुद्धो व्रजेत्स माम् ।। २९

शंख घंटा प्रदानेन विद्वान्भवति शब्दवान् ।।
विधाय रथयात्रां च चिरं शोकैः प्रमुच्यते ।। ३०

नमस्कारं प्रणामं च कृत्वा जायेन्महाकुले ।।
वाचयंश्चाग्रतः शास्त्रं मम ज्ञानी प्रजायते ।। ३१

विमुच्यते मनोमोहैर्भक्तया स्तुत्वा च मां नरः ।।
गोदान फलमाप्नोति निर्माल्यस्फोटनान्मम ।। ३२

आरार्तिकं भ्रामयित्वा अर्तिहीनः प्रजायते ।।
कृत्वा शीतलिकां तापैर्मुच्यते दोष्ण संभवैः ।। ३३

नत्वा दत्त्वाथ शक्त्या च दानं लिंगस्य संनिधौ ।।
फलं शतगुणं प्राप्य इह चामुत्र मोदते ।। ३४

प्रणामात्पंचदश च स्नानाद्विंशतिं पूजया ।।
शतं यथाप्रोक्तविधेर पराधानहं क्षमे ।। ३५

---

१ ब. नृत्यं

एतत्सर्वं यथोदिष्टं कुमारात्र भविष्यति ।।
ये मां प्रपूजयिष्यंति कुमारेश्वर संस्थितम् ।। ३६

वाराणस्यां यथा वत्स विश्वनाथो/स्मि संस्थितः ।। ३७

गुप्तक्षेत्रे तथा स्थास्ये कुमारेश्वर मध्यतः ।। ३८

श्रुत्वेति वचनं रुद्रादेवानां श्रृण्वतां गुहः[1] ।।
विस्मितः प्रणिपत्यैनं[2] तुष्टाव गिरिजापतिम् ।। ३९

नमः[3] शिवायास्तु निरामयाय नमः शिवायास्तु मनोमयाय ।।
नमः शिवायास्तु भवोद्भवाय नमोस्तु ते ध्वस्तमनो भवाय ।।
नमो/स्तु ते गूढमहाव्रताय नमो/स्तु माया गहनाश्रयाय ।। ४१

नमोस्तु शर्वाय नमः शिवाय नमोस्तु सिद्धाय पुरातनाय ।।
नमोस्तु कालाय नमः कलाय नमो/स्तु ते कालकलातिगाया ।। ४२

---------------------------------------------------------------थ

१ ब. गुह
२ ब. येनं
३ ब. नम

नमो निसर्गात्मकभूतिकाय नमो स्त्वमेयौक्षमहर्द्धिकाय ।।
नमः शरण्याय नमोऽगुणाय नमोऽस्तु ते भीमगुणानुगाय ।। ४३

नमोऽस्तु नानाभुवनाधिकर्त्रे नमोऽस्तु भक्ताभिमतप्रदात्रे ।।
नमोऽस्तु कर्मप्रसवाय धात्रे नमः सदा ते भगवन्सुकर्त्रे ।। ४४

अनंतरूपाय सदैव तुभ्यमसह्य कोपाय सदैव तुभ्यम् ।।
अमेयमानाय नमोस्तु तुभ्यं वृषेंद्रयानाय नमोऽस्तु तुभ्यम् ।। ४५

नमः प्रसिद्धाय महौषधाय नमोऽस्तु ते व्याधिगणापहाय ।।
चराचरायाथ विचारदाय कुमारनाथाय नमः शिवाय ।। ४६

ममेश[१] भूतेश महेश्वरोसि कामेश वागीश बलेश धीश[२] ।।
क्रोधेश[३] मोहेश परापरेश नमोऽस्तु मोक्षेश गुहाशयेश ।। ४७

इति संस्तूय वरदं शूलपाणिमुमापतिम् ।।
प्रणिपत्य उमापुत्रो नमोनम उवाच ह ।। ५८

एवं भक्तिपराक्रांतमात्मयोग्यं स्तवं शिवः ।।
अभिनन्द्य चिरं कालमिदं वचनम ब्रवीत् ।। ४९

---

१ ब. नमेश

२ ब. भीश

३ ब. क्रेधेश

त्वया दुःखं न संचिंत्यं मम भक्तवधात्मकम् ।।
कर्मणानेन श्लाघ्योऽसि मुनीनामपि पुत्रक ।। ५०

ये च सायं तथा प्रातस्त्वत्कृतेन स्तवेन माम् ।।
स्तोष्यंति परया भक्त्या शृणु तेषां च यत्फलम् ।। ५१

न व्याधिर्न च दारिद्र्यं न चैवेष्ट वियोजनम् ।।
भुक्ता भोगान्दुर्लभांश्च मम यास्यंति सद्म ते ।। ५२

तथान्यानपि दास्यामि वरान्परम दुर्लभान् ।।
भक्त्या तवाति तुष्टोहं प्रीत्यर्थं तव पुत्रक ।। ५३

महीसागरकूले तु ये मां स्तोष्यंति पूजया ।।
तेषां तदक्षयं सर्वं[१] वैशाख्यां दानपूजनम् ।। ५४

सरस्यत्र[२] च ये स्नानं प्रकरिष्यंति मानवाः ।।
सर्वतीर्थ फलावाप्ति वैशाख्यां प्रभविष्यति ।। ५५

कुमारेशं तु मा भक्त्या महीसागर संगमे ।।
स्नात्वा संपूजयेन्नित्यं तस्य जातिस्मृतिर्भवेत् ।। ५६

---

१ ब. सर्व
२ ब. सरस्वत्र

जाति स्मृतिरियं पुत्र यस्यां जातो प्रजायते ।।
स्मरते/स्याः प्रकर्तव्यं श्रेयार्रूपं सुदुर्लभम् ।। ५७

यस्मिन्काले ह्यनावृष्टिर्जायते कृतिकासुत ।।
स्नापयेद्विधिवन्मां च कलशैर्विविधैः शुभैः ।। ५८

एकरात्रं त्रिरात्रं वा पञ्चरात्रं च सप्तवा ।।
स्नापयेद्गंध तोयेन कुंकुमेन विलेपयेत् ।। ५९

करवीरै रक्त पुष्पैर्ज पापुष्पैस्तथैव च ।।
अर्चयेत्पुष्पमालाभिः परिधायारुणवाससी ।। ६०

भोजयेद्ब्राह्मणांश्चैव तापसांश्च सितव्रतान् ।।
लक्षहोमं प्रकुर्वीत शिव होमं[१] ग्रहादिकम् ।। ६१

भूमिदानं ततः कुर्यात्तथो दधाद्गवाहिन् कम् ।।
आघोषयेच्छिवां शांतिं रुद्रजाप्यं हि कारयेत् ।। ६२

अनेनैव विधानेन कृतेन तु द्विजोत्तमैः ।।
अगर्भितास्तदा मेघा[२] वर्षंति नात्र संशयः ।। ६३

---

१ ब. होम

२ ब. माघा

*विविधैः पूर्यते धान्यैः शाद्वलैश्च वसुन्धरा ।।
आरोग्यं हि[1] भवेच्चैव जने गोपकुले तथा ।। ६४

धर्मयुक्तो भवेद्राजा परचक्रैर्न पीड्यते ।।
घृतेन स्नापयेन्मां च अर्कक्रांतौ नरोऽत्रयः ।। ६५

कन्यादान फलं तस्य नात्र कार्या विचारणा ।।
क्षीरेण स्नापयेदेवं तथा पंचामृतेन यः ।। ६६

*[2]अग्निष्टोमस्य यज्ञस्य फलं तस्योपजायते ।।
कुमारेश्वर तीर्थे यः प्राणत्यागं करोति हि ।। ६७

रुद्रलोके वसेत्तावद्यावदाभूत संप्लवम् ।।
अयने विषुवे चैव ग्रहणे चंद्रसूर्ययोः ।। ६८

[3]पौर्णमास्याममावास्यां संक्रांतौ वैधृते तथा ।।
कुमारेशं नरः स्नात्वा महीसागर संगमे ।। ६९

*भक्त्या योऽभ्यर्चयेन्मां च तस्य पुण्यफलं श्रृणु ।।
यन्महीतलतीर्थेषु स्नानेस्यात्तु महत्फलम् ।। ७०

---

१ ब. प्रतौ "त्वं" पाठः ।
*२ अग्नि..... पजायते ।
कुमारे..... हि ।।
ब. प्रतौ इत्ययं श्लोकः नास्ति ।
३ ब. पूर्णमास्या....

यच्चार्चितेषु लिंगेषु सर्वेषु स्यात्फलं च तत् ।।
आरोग्यं पुत्रलाभं च धनलाभं सुखं सुतम् ।। ७१

निश्चितं लभते मर्त्यः कुमारेश्वर सेवया ।।
ब्रह्मचारी शुचिर्भूत्वा वस्तिष्ठेदत्र तापसः[१] ।। ७२

परं पाशुपतं योगं प्राप्य याति लयं मयि ।।
पापात्मनां च मर्त्यानां सद्यो ऽस्मिफलदर्शकः ।। ७३

दिव्येनाष्टविधेनात्र कोशः साधारणो ऽत्र च ।।
अघोराद्यैः पंचमंत्रैः स्नाप्य लिंगं महोज्ज्वलम् ।। ७४

अघोरेणैव तत्तोयं दद्यादिव्यस्य कारणे ।।
निवेदेतद्दद्यात्र प्रसृतित्रयमेव च ।। ७५

यदि धर्मस्तथा सत्यमीश्वरो ऽत्र जगत्रये ।।
कोशपानात्फलं सद्यो द्रश्याम्यस्मि शुभाशुभम् ।। ७६

यास्ये चेति कुलं हन्याद्गमने च कुटुम्बकम् ।।
दर्शने च शुभं पाने हन्यादेहं च मिथ्यया ।। ७७

---

१ ब. स

त्रिभिर्दिनैस्त्रिभिः पक्षैस्त्रिभिर्मासैस्त्रिभिः समैः ।।
अत्युग्रपुण्यपापानां मानेन फलमश्नुते ।। ७८

एते [1]वरा मया लिंगे दत्तात्र स्थापिते त्वया ।।
तव प्रीत्यभिवृद्ध्यर्थं ब्रूहि भूयोऽप्युमात्मज ।। ७९

स्कन्द उवाच ।।
कृतकृत्यो वरैर्दत्तैस्त्वया चैतैर्महेश्वर ।।
नमोनमो नमस्तेस्तु नात्र त्याज्यं त्वया विभो ।। ८०

एवं प्रणम्य देवं स मातरं प्रणतोऽब्रवीत् ।।
त्वयापि मातर्नैवात्र त्याज्यं मम प्रियेप्सया ।। ८१

त्वामप्यत्र स्थापयिष्ये वरदा भव पार्वति ।। ८२

श्री देव्युवाच ।।[2]
यत्र शर्वः स्वभावेन तत्र तिष्ठाम्यहं सुत[3] ।। ८३

तव भक्त्या विशेषेण स्थास्ये स्त्रीणां वरप्रदा ।।
युद्धेषु तव कर्माणि रुद्रभक्तेषु ते कृपाम् ।। ८४

---

१ ब. मया वरा
२ ब. श्री देव्यु० ।।
३ ब. सुतः

पश्यंती पुत्रिणां मुख्या प्रीणिता च भृशं त्वया ।।
गर्भक्लेशः स्त्रियो मन्ये साफल्यं भजते तदा ।। ८५

सुतो यदा रुद्रभक्तः सानंदं सद्भिरीर्यते ।।
भव तस्मात्प्रियार्थाय तिष्ठाम्यत्र षाडानन ।। ८६

स्त्रीभिराराधिता दास्ये सौभाग्यं सुपतिं सुतान् ।।
चैत्रे चापि तृतीयायां स्नात्वा शीतेन वारिणा ।। ८७

अर्चयिष्यंति मां याश्च पुष्पैर्धूपैर्विलेपनैः ।।
दास्यामि[१] चाष्ट सौभाग्यं या नारी भक्तितत्परा ।। ८८

पितरौ श्वसुरौ पुत्रान्पतिं सौभाग्य संपदः ।।
कुंकुमं पुष्प श्री खंडं तांबूलांजनमिक्षवः ।। ८९

सप्तमं लवणं प्रोक्तमष्टमं च सुजीरकम् ।।
तोलयेत्तुलया वापि सांध्रिश्च तुलिता भवेत् ।। ९०

सुवर्णनाथ सौगन्ध्यद्रव्यैः शुभफलैरपि ।।
भुंक्त वा[२] लवणं पक्वान्नासौ वै विधवा भवेत् ।। ९१

---

१ ब. दास्यते

२ "चा" ब. पाठः ।

माघे वा कार्तिके वापि चैत्रे स्नात्वार्चयेत माम् ।।
दौर्भाग्यदुःख दारिद्र्यैर्न सा संयोगमाप्नुयात् ।। ९२

श्रुत्वेति गिरिजावाचं सानंदः पार्वती सुतः ।।
स्थापयित्वा गिरिसुतां कपर्दिनमथा ब्रवीत् ।। ९३

पुष्पैर्धूपै मोदकैश्च पूर्वमभ्यर्च्य त्वां प्रभो ।।
पूजयंति कुमारेशं तेषां विघ्नहरो भव ।। ९४

कपर्द्युवाच ।।[१]
भ्रातस्त्वया स्थापितेऽस्मि लिंगे भक्ताश्च ये नराः ।।
न तेषां नम विघ्नानि[२] मम वागनुगामिनी ।। ९५

एवमुक्ते विघ्नराज्ञा प्रतीतेऽस्थापयच्च तम् ।।
तस्मादसौ सदाभ्यर्च्यश्चतुर्थ्यां च विशेषतः ।। ९६

एवं स्थाप्य कुमारेशं लब्ध्वा चैतान्वरांछिवात् ।।
मनसा कृत कृत्यं चात्मानं मेने षाडाननः ।। ९७

तस्थावंशेन तत्रैव कुमारेश्वर संनिधौ ।।
अत्र स्थितं कुमारं ये पश्यन्ति स्वामियात्रिणः ।। ९८

---

१ ब. प्रतौ "कैवद्यु " इति स्यात् ।
२ ब. "ति" पाठः ।

सफला[१] स्वामियात्रा च तेषां भवति भारत ।।
कार्तिक्यां च विशेषेण कार्तिकेयं समर्चयेत् ।। ९९

यत्फलं स्वामियात्रायां तत्फलं समवाप्नुयात् ।।
एवंविधमिदं पार्थ महीसागरसंगमम् ।। १००

निमित्तीकृत्य चात्मानं साध्वर्थे लिंगमर्चितम् ।।
रोगाभिभूतो रोगैर्वा नाम्नामष्टोत्तरं शतम् ।। १०१

जप्त्वा शुचिर्ब्रह्मचारी मासं मुच्यते पातकात् ।।
एतदाराध्य संजाता रजिरामादयः पुरा ।। १०२

शत संख्याबलं राज्यं रुद्रलोक च भेजिरे ।।
जामदग्न्यस्त्विदं लिंगमाराध्य च समायुतम् ।। १०३

लेभे कुठारमुज्जह्ने येनार्जुन भुजान्युधि ।।
अग्रतो देवदेवस्य ज्ञात्वा तीर्थे महागुणान्[२] ।। १०४

रामेश्वरमिति ख्यातं स्थापितं लिंगमुत्तमम् ।।
तच्च योऽभ्यर्चयेद्भक्त्या रुद्रलोकं स गच्छति ।। १०५

---

१ ब. स्वफला

२ ब. गुणाः

प्रीतः स्यात्तस्य रामश्च कुमारेशश्च फाल्गुन ।।
इति संक्षेपतः प्रोक्तं कुमारेशस्य वर्णनम् ।। १०६

कुमारेशस्य माहात्म्यं कीर्तयेद्यस्तदग्रतः ।।
ये च शृण्वंत्यनुदिनं रुद्रलोके वसंति ते[1] ।। १०७

अस्य लिंगस्य माहात्म्यं श्राद्धकाले तु यः पठेत् ।।
पितृणामक्षयं श्राद्धं जायते नात्र संशयः ।। १०८

अस्य[2] लिंगस्य माहात्म्यं गुर्विणीं श्रावयेद्यदि ।।
गुणवांजायते पुत्रः कन्या चापि पतिव्रता ।। १०९

एतत्पुण्यं पापहरं धर्म्यं चाह्लादकारकम् ।।
पठतां शृण्वतां चापि सर्वाभीष्टफलप्रदम् ।। ११०

*३ इति श्री स्कांदे..... कुमारेश स्थापन पूर्वक माहात्म्य वर्णनं नाम
चतुस्त्रिंशोऽध्यायः ।।

---

१ ब. तः

२ ब. योस्य

*३ ब. इति श्री स्कंदपुराणे कुमारिकाखंडे कुमारेश्वर माहात्म्ये
चतुर्थत्रिंशोऽध्यायः ।।